# Ramagita from Adbhutaramayana

# રામગીતા અદ્ભુતરામાયણાન્તર્ગતમ્

## Document Information

Text title : rAmagItAadbhutarAmAyaNa

File name : rAmagItAadbhutarAmAyaNa.itx

Category : giitaa, raama

Location : doc_giitaa

Transliterated by : Vishwas Bhide vrbhide at rediffmail.com

Proofread by : Vishwas Bhide and PSA Easwaran

Description/comments : Adbhutaramayana Sarga 11-14

Latest update : September 17, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 23, 2022

*sanskritdocuments.org*

# રામગીતા અદ્ભુતરામાયણાન્તર્ગતમ્

## એકાદશઃ સર્ગઃ ।

હનૂમતે શ્રીરામકૃતં સાઙ્ખ્યયોગવર્ણનમ્ -

રામઃપ્રાહ હનૂમન્તમાત્માનં પુરુષોત્તમઃ ।
વત્સ વત્સ હનૂમન્સ્ત્વં ભક્તો યત્પૃષ્ટશનસિ ॥ ૧॥

તત્તેઽહં સમ્પ્રવક્ષ્યામિ શૃણુષ્વાવહિતો મમ ।
અવાચ્યમેતદ્વિજ્ઞાનમાત્મગુહ્યં સનાતનમ્ ॥ ૨॥

યન્ન દેવા વિજાનન્તિ યતન્તોઽપિ દ્વિજાતયઃ ।
ઇદં જ્ઞાનં સમાશ્રિત્ય બ્રહ્મભૂતા દ્વિજોત્તમાઃ ॥ ૩॥

ન સંસારં પ્રપશ્યન્તિ પૂર્વેઽપિ બ્રહ્મવાદિનઃ ।
ગુહ્યાદ્ગુહ્યતમં સાક્ષાદ્ગોપનીયં પ્રયત્નતઃ ॥ ૪॥

વંશે ભક્તિમતો હ્યસ્ય ભવન્તિ બ્રહ્મવાદિનઃ ।
આત્મા યઃ કેવલઃ સ્વચ્છઃ શાન્તઃ સૂક્ષ્મઃ સનાતનઃ ॥ ૫॥

અસ્તિ સર્વાન્તરઃ સાક્ષાચ્ચિન્માત્રસ્તમસઃ પરઃ ।
સોઽન્તર્યામી સ પુરુષઃ સ પ્રાણઃ સ મહેશ્વરઃ ॥ ૬॥

સ કાલાગ્નિસ્તદવ્યક્તં સદ્યો વેદયતિ શ્રુતિઃ ।
તસ્માદ્વિજાયતે વિશ્વમત્રૈવ પ્રવિલીયતે ॥ ૭॥

માયાવી માયયા બદ્ધઃ કરોતિ વિવિધાસ્તનૂઃ ।
ન ચાપ્યયં સંસરતિ ન ચ સંસારયેત્પ્રભુમ્ ॥ ૮॥

નાયં પૃથ્વી ન સલિલં ન તેજઃ પવનો નભઃ ।
ન પ્રાણો ન મનો વ્યક્તં ન શબ્દઃ સ્પર્શ એવ ચ ॥ ૯॥

ન રૂપરસગન્ધાશ્ચ નાહઙ્કર્તા ના વાગપિ ।
ન પાણિપાદૌ નો પાયુર્ન ચોપસ્થં પ્લવઙ્ગમ ॥ ૧૦॥

ન કર્તા ન ચ ભોક્તા ચ ન ચ પ્રકૃતિપૂરૂષૌ ।
ન માયા નૈવ ચ પ્રાણશ્ચૈતન્યં પરમાર્થતઃ ॥ ૧૧॥

તથા પ્રકાશતમસોઃ સમ્બન્ધો નોપપદ્યતે ।
તદ્વદેવ ન સમ્બન્ધઃ પ્રપઞ્ચપરમાત્મનોઃ ॥ ૧૨॥

છાયાતરૂ યથા લોકે પરસ્પરવિલક્ષણૌ ।
તદ્વત્પ્રઞ્ચપુરુષૌ વિભિન્નૌ પરમાર્થતઃ ॥ ૧૩॥

યદ્યાત્મા મલિનોઽવસ્થૌ વિકારી સ્યાત્સ્વભાવતઃ ।
નહિ તસ્ય ભવેન્મુક્તિર્જન્માન્તરશતૈરપિ ॥ ૧૪॥

પશ્યન્તિ મુનયો મુક્તાઃ સ્વાત્માનં પરમાર્થતઃ ।
વિકારહીનં નિર્દુઃખમાનન્દાત્માનમવ્યયયમ્ ॥ ૧૫॥

અહં કર્તા સુખી દુઃખી કૃશઃ સ્થૂલેતિ યા મતિઃ ।
સાપ્યહઙ્કૃતિસમ્બન્ધાદાત્મન્યારોપ્યતે જનૈઃ ॥ ૧૬॥

વદન્તિ વેદવિદ્વાન્સઃ સાક્ષિણં પ્રકૃતેઃ પરમ્ ।
ભોક્તારમક્ષયં બુદ્ધ્વા સર્વત્ર સમવસ્થિતમ્ ॥ ૧૭॥

તસ્માદજ્ઞાન મૂલોઽયં સંસારઃ સર્વ દેહિનામ્ ।
અજ્ઞાનાદન્યથા જ્ઞાતં તચ્ચ પ્રકૃતિસઙ્ગતમ્ ॥ ૧૮॥

નિત્યોદિતઃ સ્વયઞ્જ્યોતિઃ સર્વગઃ પુરુષઃ પરઃ ।
અહઙ્કારીઽવિવેકેન કર્તાહમિતિ મન્યતે ॥ ૧૯॥

પશ્યન્તિ ઋષયો વ્યક્તં નિત્યં સદસદાત્મકમ્ ।
પ્રધાનં પ્રકૃતિં બુદ્ધ્વા કારણં બ્રહ્મવાદિનઃ ॥ ૨૦॥

તેનાત્ર સઙ્ગતો હ્યાત્મા કૂટસ્થોઽપિ નિરઞ્જનઃ ।
આત્સાનમક્ષરં બ્રહ્મ નાવબુદ્ધ્યન્તિ તત્ત્વતઃ ॥ ૨૧॥

અનાત્મન્યાત્મવિજ્ઞાનં તસ્માદ્દુઃખઃ તથેતરત્ ।
રાગદ્વેષાદયો દોષાઃ સર્વભ્રાન્તિનિબન્ધનાઃ ॥ ૨૨॥

કાર્યે હ્યસ્ય ભવેદેષા પુણ્યાપુણ્યમિતિ શ્રુતિઃ ।
તદ્વશાદેવ સર્વેષાં સર્વદેહસમુદ્ભવઃ ॥ ૨૩॥

નિત્ય સર્વત્રગો હ્યાત્મા કૂટસ્થો દોષવર્જિતઃ ।

એકઃ સ ભિદ્યતે શક્ત્યા માયયા ન સ્વભાવતઃ ॥ ૨૪॥

તસ્માદદ્વૈતમેવાહુર્મુનયઃ પરમાર્થતઃ ।
ભેદોઽવ્યક્તસ્વભાવેન સા ચ માયાઽઽત્મસંશ્રયા ॥ ૨૫॥

યથાહિ ધૂમસમ્પર્કાન્નાકાશો મલિનો ભવેત્ ।
અન્તઃકરણજૈર્ભાવૈરાત્મા તદ્વન્ન લિપ્યતે ॥ ૨૬॥

યથા સ્વપ્રભયા ભાતિ કેવલઃ સ્ફટિકોપલઃ ।
ઉપાધિહીનો વિમલસ્તથૈવાત્મા પ્રકાશતે ॥ ૨૭॥

જ્ઞાનસ્વરૂપમેવાહુર્જગદેતદ્વિચક્ષણાઃ ।
અર્થસ્વરૂપમેવાજ્ઞાઃ પશ્યન્ત્યન્યે કુબુદ્ધયઃ ॥ ૨૮॥

કૂટસ્થો નિર્ગુણો વ્યાપી ચૈતન્યાત્મા સ્વભાવતઃ ।
દૃશ્યતે હ્યર્થરૂપેણ પુરુષં ભ્રાન્તદૃષ્ટિભિઃ ॥ ૨૯॥

યથા સંલક્ષ્યતે વ્યક્તઃ કેવલઃ સ્ફટિકો જનૈઃ ।
રક્તિકાવ્યવધાનેન તદ્વત્પરમપૂરુષઃ ॥ ૩૦॥

તસ્માદાત્માક્ષરઃ શુદ્ધો નિત્યઃ સર્વગતોઽવ્યયઃ ।
ઉપાસિતવ્યો મન્તવ્યઃ શ્રોતવ્યશ્ચ મુમુક્ષુભિઃ ॥ ૩૧॥

યદા મનસિ ચૈતન્યં ભાતિ સર્વત્રગં સદા ।
યોગિનોઽવ્યવધાનેન તદા સમ્પદ્યતે સ્વયમ્ ॥ ૩૨॥

યદા સર્વાણિ ભૂતાનિ સ્વાત્મન્યેવાભિ પશ્યતિ ।
સર્વભૂતેષુ ચાત્માનં બ્રહ્મ સમ્પદ્યતે સ્વયમ્ ॥ ૩૩॥

યદા સર્વાણિ ભૂતાનિ સ્વાત્મન્યેવાભિપશ્યતિ ।
એકીભૂતઃ પરેણાસૌ તદા ભવતિ કેવલઃ ॥ ૩૪॥

યદા સર્વે પ્રમુચ્યન્તે કામા યેઽસ્ય હૃદિ સ્થિતાઃ ।
તદાસાવમૃતીભૂતઃ ક્ષેમં ગચ્છતિ પણ્ડિતઃ ॥ ૩૫॥

યદા ભૂતપૃથગ્ભાવમેકસ્થમનુપશ્યતિ ।
તત એવ ચ વિસ્તારં બ્રહ્મ સમ્પદ્યતે તદા ॥ ૩૬॥

યદા પશ્યતિ ચાત્માયં કેવલં પરમાર્થતઃ ।
માયામાત્રં જગત્કૃત્સ્નં તદા ભવતિ નિર્વૃતઃ ॥ ૩૭॥

યદા જન્મજરાદુઃખવ્યાધીનામેકભેષજમ્ ।
કેવલં બ્રહ્મવિજ્ઞાનં જાયતેઽસૌ તદા શિવઃ ॥ ૩૮॥

યથા નદીનદા લોકે સાગરેણૈકતાં યયુઃ ।
તદ્વદાત્માક્ષરેણાસૌ નિષ્કલેનૈકતાં વ્રજેત્ ॥ ૩૯॥

તસ્માદ્વિજ્ઞાનમેવાસ્તિ ન પ્રપઞ્ચો ન સંસ્થિતિઃ ।
અજ્ઞાનેનાવૃતં લોકં વિજ્ઞાનં તેન મુહ્યતિ ॥ ૪૦॥

તજ્જ્ઞાનં નિર્મલં સૂક્ષ્મં નિર્વિકલ્પં યદવ્યયમ્ ।
અજ્ઞાનમિતિ તત્સર્વં વિજ્ઞાનમિતિ મે મતમ્ ॥ ૪૧॥

એતત્તે પરમં સાઙ્ખ્યં ભાવિતં જ્ઞાનમુત્તમમ્ ।
સર્વવેદાન્તસારં હિ યોગસ્તત્રૈકચિત્તતા ॥ ૪૨॥

યોગાત્સઞ્જાયતે જ્ઞાનં જ્ઞાનાદ્યોગઃ પ્રજાયતે ।
યોગજ્ઞાનાભિયુક્તસ્ય નાવાપ્યં વિદ્યતે ક્વચિત્ ॥ ૪૩॥

યદેવ યોગિનો યાન્તિ સાઙ્ખ્યં તદભિગમ્યતે ।
એકં સાઙ્ખ્યં ચ યોગં ચ યઃ પશ્યતિ સ તત્ત્વવિત્ ॥ ૪૪॥

અન્યે ચ યોગિનો વત્સ ઐશ્વર્યાસક્તચેતસઃ ।
મજ્જન્તિ તત્ર તત્રૈવ સત્ત્વાત્મૈક્યમિતિ શ્રુતિઃ ॥ ૪૫॥

યત્તત્સર્વગતં દિવ્યમૈશ્વર્યમચલં મહત્ ।
જ્ઞાનયોગાભિયુક્તસ્તુ દેહાન્તે તદવાપ્નુયાત્ ॥ ૪૬॥

એષ આત્માહમવ્યક્તો માયાવી પરમેશ્વરઃ ।
કીર્તિતઃ સર્વવેદેષુ સર્વાત્મા સર્વતોમુખઃ ॥ ૪૭॥

સર્વકામઃ સર્વરસઃ સર્વગન્ધોઽજરોઽમરઃ ।
સર્વતઃ પાણિપાદોઽહમન્તર્યામી સનાતનઃ ॥ ૪૮॥

અપાણિપાદો જવનો ગૃહીતો હૃદિ સંસ્થિતઃ ।
અચક્ષુરપિ પશ્યામિ તથાઽકર્ણઃ શૃણોમ્યહમ્ ॥ ૪૯॥

વેદાહં સર્વમેવેદં ન માં જાનાતિ કશ્ચન ।
પ્રાહુર્મહાન્તં પુરુષં મામેકં તત્ત્વદર્શિનઃ ॥ ૫૦॥

નિર્ગુણામલરૂપસ્ય યત્તદૈશ્વર્યમુત્તમમ્ ।
યત્ર દેવા વિજાનન્તિ મોહિતા માયયા મમ ॥ ૫૧॥

યન્મે ગુહ્યતમં દેહં સર્વગં તત્ત્વદર્શિનઃ ।
પ્રવિષ્ટા મમ સાયુજ્યં લભન્તે યોગિનોઽવ્યયમ્ ॥ ૫૨॥

યેષાં હિ ન સમાપન્ના માયા વૈ વિશ્વરૂપિણી ।
લભન્તે પરમં શુદ્ધં નિર્વાણં તે મયા સહ ॥ ૫૩॥

ન તેષાં પુનરાવૃત્તિઃ કલ્પકોટિશતૈરપિ ।
પ્રસાદાન્મમ તે વત્સ એતદ્વેદાનુશાસનમ્ ॥ ૫૪॥

નાપુત્રશિષ્યયોગિભ્યો દાતવ્યં હનુમન્ક્વચિત્ ।
યદુક્તમેતદ્વિજ્ઞાનં સાઙ્ખ્યયોગસમાશ્રયમ્ ॥ ૫૫॥

ઇત્યાર્ષે શ્રીમદ્રામાયણે વાલ્મીકીયે આદિકાવ્યે
અદ્ભુતોત્તરકાણ્ડે સાઙ્ખ્યયોગો નામૈકાદશઃ સર્ગઃ ॥ ૧૧॥

## દ્વાદશઃ સર્ગઃ ।

ઉપનિષત્કથનમ્ -

પુનઃ રામઃ પ્રવચનમુવાચ દ્વિજપુઙ્ગવ ।
અવ્યક્તાદભવત્કાલઃ પ્રધાનં પુરુષઃ પરઃ ॥ ૧॥

તેભ્યઃ સર્વમિદં જાતં તસ્માત્સર્વમિદં જગત્ ।
સર્વતઃ પાણિપાદં તત્સર્વતોઽક્ષિશિરોમુખમ્ ॥ ૨॥

સર્વત શ્રુતિમલ્લોકે સર્વમાવૃત્ય તિષ્ઠતિ ।
સર્વેન્દ્રિયગુણાભાસં સર્વેન્દ્રિયવિવર્જિતમ્ ॥ ૩॥

સર્વાધારં સ્થિરાનન્દમવ્યક્તં દ્વૈતવર્જિતમ્ ।
સર્વોપમાનરહિતં પ્રમાણાતીતગોચરમ્ ॥ ૪॥

નિર્વિકલ્પં નિરાભાસં સર્વાભાસં પરામૃતમ્ ।
અભિન્નં ભિન્નસંસ્થાનં શાશ્વતં ધ્રુવમવ્યયમ્ ॥ ૫॥

નિર્ગુણં પરમં વ્યોમ તજ્જ્ઞાનં સૂરયો વિદુઃ ।
સ આત્મા સર્વભૂતાનાં સ બાહ્યાભ્યન્તરાત્પરઃ ॥ ૬॥

સોઽહં સર્વત્રગઃ શાન્તો જ્ઞાનાત્મા પરમેશ્વરઃ ।
મયા તતમિદં વિશ્વં જગદવ્યક્તરૂપિણા ॥ ૭॥

મત્સ્થાનિ સર્વભૂતાનિ યસ્તં વેદ સ વેદવિત્ ।
પ્રધાનં પુરુષં ચૈવ તત્ત્વદ્વયમુદાહૃતમ્ ॥ ૮॥

તયોરનાદિનિર્દિષ્ટઃ કાલઃ સંયોજકઃ પરઃ ।
ત્રયમેતદનાદ્યન્તમવ્યક્તં સમવસ્થિતમ્ ॥ ૯॥

તદાત્મકં તદન્યત્સ્યાત્તદ્રૂપં મામકં વિદુઃ ।
મહદાદ્યં વિશેષાન્તં સમ્પ્રસૂતેઽખિલં જગત્ ॥ ૧૦॥

યા સા પ્રકૃતિરુદ્દિષ્ટા મોહિની સર્વદેહિનામ્ ।
પુરુષઃ પ્રકૃતિસ્થોતોઽપિભુઙ્ક્તે યઃ પ્રાકૃતાન્ગુણાન્ ॥ ૧૧॥

અહઙ્કારો વિવિક્તત્વાત્પ્રોચ્યતે પઞ્ચવિંશકઃ ।
આદ્યો વિકારઃ પ્રકૃતિર્મહનાત્મેતિ કથ્યતે ॥ ૧૨॥

વિજ્ઞાનશક્તિર્વિજ્ઞાનાદહઙ્કારસ્તદુત્થિતઃ ।
એક એવ મહાનાત્મા સોહઙ્કારોઽભિધીયતે ॥ ૧૩॥

રા જીવઃ સોઽન્તરાત્મેતિ ગીયતે તત્ત્વચિન્તકૈઃ ।
તેન વેદયતે સર્વં સુખં દુઃખં ચ જન્મસુ ॥ ૧૪॥

સ વિજ્ઞાનાત્મકસ્તસ્ય મનઃ સ્યાદુપકારકમ્ ।
તેનાવિવેકતસ્તસ્માત્સંસારં પુરુષસ્ય તુ ॥ ૧૫॥

સ ચાવિવેકઃ પ્રકૃતૌ સઙ્ગાત્કાલેન સોઽભવત્ ।
કાલઃ સૃજતિ ભૂતાનિ કાલઃ સંહરતે પ્રજાઃ ॥ ૧૬॥

સર્વે કાલસ્ય વશગા ન કાલઃ કસ્યચિદ્વશે ।
સોઽન્તરા સર્વમેવેદં નિયચ્છતિ સનાતનઃ ॥ ૧૭॥

પ્રોચ્યતે ભગવાન્પ્રાણઃ સર્વજ્ઞઃ પુરુષઃ પરઃ ।
સર્વેન્દ્રિયેભ્યઃ પરમં મનઃ પ્રાહુર્મનીષિણઃ ॥ ૧૮॥

મનસશ્ચાપ્યહઙ્કારમહઙ્કારાન્મહાન્ પરઃ ।
મહતઃ પરમવ્યક્તમવ્યક્તાત્પુરુષઃ પરઃ ॥ ૧૯॥

પુરુષાદ્ભગવાન્પ્રાણસ્તસ્ય સર્વમિદં જગત્ ।
પ્રાણાત્પરતરં વ્યોમ વ્યોમાતીતોઽગ્નિરીશ્વરઃ ॥ ૨૦॥

સોઽહં સર્વત્રગઃ શાન્તો જ્ઞાનાત્મા પરમેશ્વરઃ ।

નાસ્તિ મત્પરમં ભૂતં માં વિજ્ઞાય વિમુચ્યતે ॥ ૨૧॥

નિત્યં હિ નાસ્તિ જગતિ ભૂતં સ્થાવરજઙ્ગમમ્ ।
ઋતે મામેકમવ્યક્તં વ્યોમરૂપં મહેશ્વરમ્ ॥ ૨૨॥

સોઽહં સૃજામિ સકલં સંહરામિ સદા જગત્ ।
માયી માયામયો દેવઃ કાલેન સહ સઙ્ગતઃ ॥ ૨૩॥

મત્સન્નિધાવેષ કાલઃ કરોતિ સકલં જગત્ ।
નિયોજયત્યનન્તાત્મા હ્યેતદ્વેદાનુશાસનમ્ ॥ ૨૪॥

ઇત્યાર્ષે શ્રીમદ્રામાયણે વાલ્મીકીયે આદિકાવ્યે
અદ્ભુતોત્તરકાણ્ડે ઉપનિષત્કથનં નામ દ્વાદશઃ સર્ગઃ ॥ ૧૨॥

## ત્રયોદશઃ સર્ગઃ

ભક્તિયોગકથનમ્ -

વક્ષ્યે સમાહિતમનાઃ શૃણુષ્વ પવનાત્મજ ।
યેનેદં લીયતે રૂપં યેનેદં સમ્પ્રવર્તતે ॥ ૧॥

નાહં તપોભિર્વિવિધૈર્ન દાનેન નચ ચેજ્યયા ।
શક્યો હિ પુરુષૈર્જ્ઞાતુમૃતે ભક્તિમનુત્તમામ્ ॥ ૨॥

અહં હિ સર્વભાવાનામન્તસ્તિષ્ઠામિ સર્વગઃ ।
માં સર્વસાક્ષિણં લોકે ન જાનન્તિ પ્લવઙ્ગમ ॥ ૩॥

યસ્યાન્તરા સર્વમિદં યો હિ સર્વાન્તરઃ પરઃ ।
સોઽહં ધાતા વિધાતા ચ લોકેઽસ્મિન્વિશ્વતોમુખઃ ॥ ૪॥

ન માં પશ્યન્તિ મુનયઃ સર્વેઽપિ ત્રિદિવૌકસઃ ।
બ્રાહ્મણા મનવઃ શક્રા યે ચાન્યે પ્રથિતૌજસઃ ॥ ૫॥

ગૃણન્તિ સતતં વેદા મામેકં પરમેશ્વરમ્ ।
યજન્તિ વિવિધૈરગ્નૌ બ્રાહ્મણા વૈદિકૈર્મખૈઃ ॥ ૬॥

સર્વેલોકા નમસ્યન્તિ બ્રહ્મલોકે પિતામહમ્ ।
ધ્યાયન્તિ યોગિનો દેવં ભૂતાધિપતિમીશ્વરમ્ ॥ ૭॥

અહં હિ સર્વયજ્ઞાનાં ભોક્તા ચૈવ ફલપ્રદઃ ।

સર્વદેવતનુર્ભૂત્વા સર્વાત્મા સર્વસંસ્તુતઃ ॥ ૮॥

માં પશ્યન્તીહ વિદ્વાન્સો ધાર્મિકા વેદવાદિનઃ ।
તેષાં સન્નિહિતો નિત્યં યે ભક્ત્તા મામુપાસતે ॥ ૯॥

બ્રાહ્મણાઃ ક્ષત્રિયા વૈશ્યા ધાર્મિકા મામુપાસતે ।
તેષાં દદામિ તત્સ્થાનમાનન્દં પરમં પદમ્ ॥ ૧૦॥

અન્યેઽપિ યે વિકર્મસ્થાઃ શૂદ્રાદ્યા નીચજાતયઃ ।
ભક્તિમન્તઃ પ્રમુચ્યન્તે કાલેન મયિ સઙ્ગતાઃ ॥ ૧૧॥

ન મદ્ભક્ત્તા વિનશ્યન્તે મદ્ભક્ત્તા વીતકલ્મષાઃ ।
આદાવેતત્પ્રતિજ્ઞાતં ન મે ભક્તઃ પ્રણશ્યતિ ॥ ૧૨॥

યો વા નિન્દતિ તં મૂઢો દેવદેવં સ નિન્દતિ ।
યો હિ તં પૂજયેદ્ભક્ત્યા સ પૂજયતિ માં સદા ॥ ૧૩॥

પત્રં પુષ્પં ફલં તોયં મદારાધનકારણાત્ ।
યો મે દદાતિ નિયતઃ સ મે ભક્તઃ પ્રિયો મતઃ ॥ ૧૪॥

અહં હિ જગતામાદૌ બ્રહ્માણં પરમેષ્ઠિનમ્ ।
વિધાય દત્તવાન્વેદાનશેષાનાસ્યનિઃસૃતાન્ ॥ ૧૫॥

અહમેવ હિ સર્વેષાં યોગિનાં ગુરુરવ્યયઃ ।
ધાર્મિકાનાં ચ ગોપ્તાહં નિહન્તા વેદવિદ્વિષામ્ ॥ ૧૬॥

અહં વૈ સર્વસંસારાન્મોચકો યોગિનામિહ ।
સંસારહેતુરેવાહં સર્વસંસારવર્જિતઃ ॥ ૧૭॥

અહમેવ હિ સંહર્તા સ્ત્રષ્ટાહં પરિપાલકઃ ।
માયાવી મામિકા શક્તિર્માયા લોકવિમોહિની ॥ ૧૮॥

મમૈવ ચ પરાશક્તિર્યા સા વિદ્યેતિ ગીયતે ।
નાશયામિ તયા માયાં યોગિનાં હૃદિ સંસ્થિતઃ ॥ ૧૯॥

અહં હિ સર્વશક્તીનાં પ્રવર્તકનિવર્તકઃ ।
આધારભૂતઃ સર્વેષાં નિધાનમમૃતસ્ય ચ ॥ ૨૦॥

એકા સર્વાન્તરા શક્તિઃ કરોતિ વિવિધં જગત્ ।
ભૂત્વા નારાયણોઽનન્તો જગન્નાથો જગન્મયઃ ॥ ૨૧॥

તૃતીયા મહતી શક્તિર્નિહન્તિ સકલં જગત્ ।
તામસી મે સમાખ્યાતા કાલાત્મા રુદ્રરૂપિણી ॥ ૨૨॥

ધ્યાનેન માં પ્રપશ્યન્તિ કેચિજ્જ્ઞાનેન ચાપરે ।
અપરે ભક્તિયોગેન કર્મયોગેન ચાપરે ।
સર્વેષામેવ ભક્તાનામેષ પ્રિયતરો મમ ॥ ૨૩॥

યો વિજ્ઞાનેન માં નિત્યમારાધયતિ નાન્યથા
અન્યે ચ યે ત્રયો ભક્તા મદારાધનકાઙ્ક્ષિણઃ ॥ ૨૪॥

તેઽપિ માં પ્રાપ્નુવન્ત્યેવ નાવર્તંતે ચ વૈ પુનઃ ।
મયા તતમિદં કૃત્સ્નં પ્રધાનપુરુષાત્મકમ્ ।
મય્યેવ સંસ્થિતં વિશ્વં મયા સમ્પ્રેર્યતે જગત્ ॥ ૨૫॥

નાહં પ્રેરયિતા કીશ પરમં યોગમાશ્રિતઃ ।
પ્રેરયામિ જગત્કૃત્સ્નમેતદ્યો વેદ સોઽમૃતઃ ॥ ૨૬॥

પશ્યામ્યશેષમેવેદં વર્તમાનં સ્વભાવતઃ ।
કરોતિ કાલે ભગવાન્મહાયોગેશ્વરઃ સ્વયમ્ ॥ ૨૭॥

યોગં સમ્પ્રોચ્યતે યોગી માયી શાસ્ત્રેષુ સૂરિભિઃ ।
યોગેશ્વરોઽસૌ ભગવાન્મહાદેવો મહાપ્રભુઃ ॥ ૨૮॥

મહત્વાત્સર્વસત્ત્વાનાં વરત્વાત્પરમેશ્વરઃ ।
પ્રોચ્યતે ભગવાન્બ્રહ્મા મહાન્બ્રહ્મમયો યતઃ ॥ ૨૯॥

યો મામેવં વિજાનાતિ મહાયોગેશ્વરેશ્વરમ્ ।
સોઽવિકમ્પેન યોગેન યુજ્યતે નાત્ર સંશયઃ ॥ ૩૦॥

સોઽહં પ્રેરયિતા દેવઃ પરમાનન્દમાશ્રિતઃ ।
તિષ્ઠામિ સતતં યોગી યસ્તદ્વેદ સ વેદવિત્ ॥ ૩૧॥

ઇતિ ગુહ્યતમં જ્ઞાનં સર્વવેદેષુ નિશ્ચિતમ્ ।
પ્રસન્નચેતસે દેયં ધાર્મિકાયાહિતાગ્નયે ॥ ૩૨॥

ઇત્યાર્ષે શ્રીમદ્રામાયણે વાલ્મીકીયે આદિકાવ્યે
અદ્ભુતોત્તરકાણ્ડે ભક્તિયોગો નામ ત્રયોદશઃ સર્ગઃ ॥ ૧૩॥

## ચતુર્દશઃ સર્ગઃ ।

શ્રીરામચન્દ્રહનુમત્સંવાદવર્ણનમ્ -

સર્વલોકૈકનિર્માતા સર્વલોકૈકરક્ષિતા ।
સર્વલોકૈકસંહર્તા સર્વાત્માઽહં સનાતનઃ ॥ ૧॥

સર્વેષામેવ વસ્તૂનામન્તર્યામી પિતા હ્યહમ્ ।
મય્યેવાન્તઃસ્થિતં સર્વં નાહં સર્વત્ર સંસ્થિતઃ ॥ ૨॥

ભવતા ચાદ્ભુતં દૃષ્ટં યત્સ્વરૂપં તુ મામકમ્ ।
મમૈષા હ્યુપમા વત્સ માયયા દર્શિતા મયા ॥ ૩॥

સર્વેષામેવ ભાવાનામન્તરા સમવસ્થિતઃ ।
પ્રેરયામિ જગત્સર્વં ક્રિયાશક્તિરિયં મમ ॥ ૪॥

મયેદં ચેષ્ટતે વિશ્વં મત્સ્વભાવાનુવર્તિ ચ ।
સોઽહં કાલે જગત્કૃત્સ્નં કરોમિ હનુમન્ કિલ ॥ ૫॥

સંહરામ્યેકરૂપેણ દ્વિધાવસ્થા મમૈવ તુ ।
આદિમધ્યાન્તનિર્મુક્તો માયાતત્ત્વપ્રવર્તકઃ ॥ ૬॥

ક્ષોભયામિ ચ સર્ગાદૌ પ્રધાનપુરુષાવુભૌ ।
તાભ્યાં સઞ્જાયતે સર્વં સંયુક્તાભ્યાં પરસ્પરમ્ ॥ ૭॥

મહદાદિક્રમેણૈવ મમ તેજોવિજૃમ્ભિતમ્ ।
યો હિ સર્વજગત્સાક્ષી કાલચક્રપ્રવર્તકઃ ॥ ૮॥

હિરણ્યગર્ભો માર્તણ્ડઃ સોઽપિ મદ્દેહસમ્ભવઃ ।
તસ્મૈ દિવ્યં સ્વમૈશ્વર્યં જ્ઞાનયોગં સનાતનમ્ ॥ ૯॥

દત્તવાનાત્મજાન્ વેદાન્ કલ્પાદૌ વતુરઃ કિલ ।
સ મન્નિયોગતો બ્રહ્મા સદા મદ્ભાવભાવિતઃ ॥ ૧૦॥

દિવ્યં તન્મામકૈશ્વર્યં સર્વદા વહતિ સ્વયમ્ ।
સ સર્વલોકનિર્માતા મન્નિયોગેન સર્વવિત્ ॥ ૧૧॥

ભૂત્વા ચતુર્મુખઃ સર્વં સૃજત્યેવાત્મસમ્ભવઃ ।
યોઽપિ નારાયણોઽનન્તો લોકાનાં પ્રભવાવ્યયઃ ॥ ૧૨॥

મમૈવ પરમા મૂર્તિઃ કરોતિ પરિપાલનમ્ ।

યોઽન્તકઃ સર્વભૂતાનાં રુદ્રઃ કાલાત્મકઃ પ્રભુઃ ॥ ૧૩॥

મદાજ્ઞયાઽસૌ સતતં સંહારત્યેવ મે તનુઃ ।
હવ્યં વહતિ દેવાનાં કવ્યં કવ્યાશિનામપિ ॥ ૧૪॥

પાકં ચ કુરુતે વહ્નિઃ સોઽપિ મચ્છક્તિચોદિતઃ ।
ભુક્તમાહારજાતં યત્પચત્યેતદહર્નિશમ્ ॥ ૧૫॥

વૈશ્વાનરોઽગ્નિર્ભગવાનીશ્વરસ્ય નિયોગતઃ ।
યો હિ સર્વામ્ભસાં યોનિર્વરુણો દેવપુઙ્ગવઃ ॥ ૧૬॥

સ સઞ્જીવયતે સર્વમીશસ્યૈવ નિયોગતઃ ।
યોઽન્તસ્તિષ્ઠતિ ભૂતાનાં બહિર્દેવો નિરઞ્જનઃ ॥ ૧૭॥

મદાજ્ઞયાસૌ ભૂતાનાં શરીરાણિ બિભર્તિ હિ ।
યોઽપિ સઞ્જીવનો નૃણાં દેવાનામમૃતાકરઃ ॥ ૧૮॥

સોમઃ સ મન્નિયોગેન ચોદિતઃ કિલ વર્તતે ।
યઃ સ્વભાસા જગત્કૃત્સ્નં પ્રકાશયતિ સર્વદા ॥ ૧૯॥

સૂર્યો વૃષ્ટિં વિતનુતે શાસ્ત્રેણૈવ સ્વયમ્ભુવઃ ।
યોઽપ્યશેષજગચ્છાસ્તા શક્રઃ સર્વામરેશ્વરઃ ॥ ૨૦॥

યજ્ઞાનાં ફલદો દેવો વર્તતેઽસૌ મદાજ્ઞયા ।
યઃ પ્રશાસ્તા હ્યસાધૂનાં વર્તતે નિયમાદિહ ॥ ૨૧॥

યમો વૈવસ્વતો દેવો દેવદેવનિયોગતઃ ।
યોઽપિ સર્વધનાધ્યક્ષો ધનાનાં સમ્પ્રદાયકઃ ॥ ૨૨॥

સોઽપીશ્વરનિયોગેન કુબેરો વર્તતે સદા ।
યઃ સર્વરક્ષસાં નાથસ્તાપસાનાં ફલપ્રદાઃ ॥ ૨૩॥

મન્નિયોગાદસૌ દેવો વર્તતે નિરૃતિઃ સદા ।
વૈતાલગણભૂતાનાં સ્વામી ભોગફલપ્રદઃ ॥ ૨૪॥

ઈશાનઃ સર્વભક્તાનાં સોઽપિ તિષ્ઠેન્મમાજ્ઞયા ।
યો વામદેવોઽઙ્ગિરસઃ શિષ્યો રુદ્રગણાગ્રણીઃ ॥ ૨૫॥

રક્ષકો યોગિનાં નિત્યં વર્તતેઽસૌ મદાજ્ઞયા ।
યશ્ચ સર્વજગત્પૂજ્યયો વર્તતે વિઘ્નકારકઃ ॥ ૨૬॥

વિનાયકો ધર્મનેતા સોઽપિ મદ્વચનાત્કિલ ।
યોઽપિ વેદવિદાં શ્રેષ્ઠો દેવસેનાપતિઃ પ્રભુઃ ॥ ૨૭॥

સ્કન્દોઽસૌ વર્તતે નિત્યં સ્વયમ્ભૂપ્રતિચોદિતઃ ।
યે ચ પ્રજાનાં પતયો મરીચ્યાદ્યા મહર્ષયઃ ॥ ૨૮॥

સૃજન્તિ વિવિધાન્ લોકાન્ પરસ્યૈવ નિયોગતઃ ।
યા ચ શ્રી સર્વભૂતાનાં દદાતિ વિપુલાં શ્રિયમ્ ॥ ૨૯॥

પત્ની નારાયણસ્યાસૌ વર્તતે મદનુગ્રહાત્ ।
વાચં દદાતિ વિપુલાં યા ચ દેવી સરસ્વતી ॥ ૩૦॥

સાપીશ્વરનિયોગેન ચોદિતા સમ્પ્રવર્તતે ।
યાશેષપુરુષાન્ ઘોરાન્નરકાત્તારયત્યપિ ॥ ૩૧॥

સાવિત્રી સંસ્મૃતા દેવી દેવાજ્ઞાનુવિધાયિની ।
પાર્વતી પરમા દેવી બ્રહ્મવિદ્યાપ્રદાયિની ॥ ૩૨॥

યાપિ ધ્યાતા વિશેષેણ સાપિ મદ્વચનાનુગા ।
યોઽનન્તો મહિમાનન્તઃ શેષોઽશેષામરઃ પ્રભુઃ ॥ ૩૩॥

દધાતિ શિરસા લોકં સોઽપિ દેવનિયોગતઃ ।
યોઽગ્નિઃ સંવર્તકો નિત્યં વડવારૂપસંસ્થિતઃ ॥ ૩૪॥

પિબત્યખિલમમ્ભોધિમીશ્વરસ્ય નિયોગતઃ ।
આદિત્યા વસવો રુદ્રા મરુતશ્ચ તથાશ્વિનૌ ॥ ૩૫॥

અન્યાશ્ચ દેવતાઃ સર્વા મચ્છાસનમધિષ્ઠિતાઃ ।
ગન્ધર્વા ઉરગા યક્ષાઃ સિદ્ધાઃ સાધ્યાશ્ચ ચારણાઃ ॥ ૩૬॥

ભૂતરક્ષઃપિશાચાશ્ચ સ્થિતાઃ શાસ્ત્રે સ્વયમ્ભુવઃ ।
કલાકાષ્ઠાનિમેષાશ્ચ મુહૂર્તા દિવસાઃ ક્ષણાઃ ॥ ૩૭॥

ઋત્વબ્દમાસપક્ષાશ્ચ સ્થિતાઃ શાસ્ત્રે પ્રજાપતેઃ ।
યુગમન્વન્તરાણ્યેવ મમ તિષ્ઠન્તિ શાસને ॥ ૩૮॥

પરાશ્ચૈવ પરાર્દ્ધાશ્ચ કાલભેદાસ્તથાપરે ।
ચતુર્વિધાનિ ભૂતાનિ સ્થાવરાણિ ચરાણિ ચ ॥ ૩૯॥

નિયોગાદેવ વર્તન્તે સર્વાણ્યેવ સ્વયમ્ભુવઃ ।
પત્તનાનિ ચ સર્વાણિ ભુવનાનિ ચ શાસનાત્ ॥ ૪૦॥

બ્રહ્માણ્ડાનિ ચ વર્તન્તે દેવસ્ય પરમાત્મનઃ ।
અતીતાન્યપ્યસઙ્ખ્યાનિ બ્રહ્માણ્ડાનિ મદાજ્ઞયા ॥ ૪૧॥

પ્રવૃત્તાનિ પદાર્થૌઘૈઃ સહિતાનિ સમં તતઃ ।
બ્રહ્માણ્ડાનિ ભવિષ્યન્તિ સહ વસ્તુભિરાત્મજૈઃ ॥ ૪૨॥

હરિષ્યન્તિ સહૈવાજ્ઞાં પરસ્ય પરમાત્મનઃ ।
ભૂમિરાપોઽનલો વાયુઃ ખં મનો બુદ્ધિરેવ ચ ॥ ૪૩॥

ભૂતાદિરાદિપ્રકૃતિર્નિયોગાન્મમ વર્તતે ।
યાઽશેષસર્વજગતાં મોહિનીં સર્વદેહિનામ્ ॥ ૪૪॥

માયાપિ વર્તતે નિત્યં સાપીશ્વરનિયોગતઃ ।
વિધૂય મોહકલિલં યથા પશ્યતિ તત્પદમ્ ॥ ૪૫॥

સાપિ વિદ્યા મહેશસ્ય નિયોગાદ્વશવર્તિની ।
બહુનાત્ર કિમુક્તેન મમ શક્ત્યાત્મકં જગત્ ॥ ૪૬॥

મયૈવ પૂર્યતે વિશ્વં મયૈવ પ્રલયં વ્રજેત્ ।
અહં હિ ભગવાનીશઃ સ્વયઞ્જ્યોતિઃ સનાતનઃ ॥ ૪૭॥

પરમાત્મા પરમ્બ્રહ્મ મત્તો હ્યન્યન્ન વિદ્યતે ।
ઇત્યેતત્પરમં જ્ઞાનં ભવતે કથિતં મયા ॥ ૪૮॥

જ્ઞાત્વા વિમુચ્યતે જન્તુર્જન્મ સંસારબન્ધનાત્ ।
માયામાશ્રિત્ય જાતોઽહં ગૃહે દશરથસ્ય હિ ॥ ૪૯॥

રામોઽહં લક્ષ્મણો હ્યેષ શત્રુઘ્નો ભારતોઽપિ ચ ।
ચતુર્ધા સમ્પ્રભૂતોઽહં કથિતં તેઽનિલાત્મજ ॥ ૫૦॥

માયાસ્વરૂપં ચ તવ કથિતં યત્પ્લવઙ્ગમ ।
કૃપયા તદ્ધૃદા ધાર્યં ન વિસ્મર્તવ્યમેવ હિ ॥ ૫૧॥

યેનાયં પઠ્યતે નિત્યં સંવાદો ભવતો મમ ।
જીવન્મુક્તો ભવેત્સોઽપિ સર્વપાપૈઃ પ્રમુચ્યતે ॥ ૫૨॥

શ્રાવયેદ્વા દ્વિજાઞ્છુદ્ધાન્બ્રહ્મચર્યપરાયણાન્ ।
યો વા વિચારયેદર્થં સ યાતિ પરમાં ગતિમ્ ॥ ૫૩॥

યશ્ચૈતચ્છૃણુયાન્નિત્યં ભક્તિયુક્તો દૃઢવ્રતઃ ।

સર્વપાપવિનિર્મુક્તો બ્રહ્મલોકે મહીયતે ॥ ૫૪॥

તસ્માત્સર્વપ્રયત્નેન પઠિતવ્યો મનીષિભિઃ ।
શ્રોતવ્યશ્ચાપિ મન્તવ્યો વિશેષાદ્બ્રાહ્મણૈઃ સદા ॥ ૫૫॥

ઇત્યાર્ષે શ્રીમદ્રામાયણે વાલ્મીકીયે આદિકાવ્યે
અદ્ભુતોત્તરકાણ્ડે ભગવદ્ધનૂમત્સંવાદો નામ ચતુર્દશઃ સર્ગઃ ॥ ૧૪॥

Adbhutaramayana Sarga 11-14

Encoded by Vishwas Bhide vrbhide at rediffmail.com
Proofread by Vishwas Bhide and PSA Easwaran

---

*Ramagita from Adbhutaramayana*
pdf was typeset on January 23, 2022

Please send corrections to *sanskrit@cheerful.com*